# त्रयोदशः पाठः

## चाणक्यचन्दनदासयोः संवादः

{ प्रस्तुत पाठ विशाखदत्त रचित ' मुद्राराक्षस' नामक नाटक के प्रथम अंक से संकलित है। राजनीति तथा कूटनीति का महान् पण्डित चाणक्य दुराचारी नन्दवंश को पाटलिपुत्र के सिंहासन से अपदस्थ करके चन्द्रगुप्त मौर्य को राजा बनाता है। नन्दवंश के विश्वासी अमात्य राक्षस के गुणों से वह बहुत प्रभावित है। उसे चन्द्रगुप्त का मन्त्री बनाने के लिए वह अपनी कूटनीति का सफल प्रयोग करता है। इसी योजना के अन्तर्गत वह पाटलिपुत्र के श्रेष्ठी चन्दनदास को बुलाकर उससे पूछताछ करता है। प्रस्तुत पाठ में अमात्य चाणक्य तथा श्रेष्ठी चन्दनदास का रोचक एवं कूटनीतिप्रवण संवाद दिया गया है। }

**चन्दनदास : –** (स्वगतम्)

**चाणक्येऽस्मिन्नकरुणे सहसा शब्दायितस्य लोकस्य।**
**वर्धते निर्दोषस्यापि शङ्का, किं जातदोषस्य।।**

तद्भणिता मया धनसेनप्रमुखास्त्रयो वाणिजका तथा 'कदापि चाणक्यहतको गेहं मे विचिनोति तदवहिता निर्वहत भर्तुः अमात्यराक्षसस्य गृहजनम् , मम तावत् यद्भवति तद्भवतु' इति।

**शिष्यः –** भोः श्रेष्ठिन् ! इत इतः।

**चन्दनदासः –** अयमागतोऽस्मि। (उभौ परिक्रामतः)

**शिष्यः** – उपाध्याय ! अयं श्रेष्ठी चन्दनदासः।

**चन्दनदास** – (उपसृत्य) जयतु जयत्वार्यः।

**चाणक्यः** – (नाट्येनावलोक्य) भोःश्रेष्ठिन्! स्वागतम्! इदमासनम् , आस्यताम्।

**चन्दनदासः** – (प्रणम्य) किं न जानाति आर्यः , यथाऽनुचित उपचारः परिभवादपि महद्दुःखमुत्पादयति, तद् इहैव अहमुचितायां भूमावुपविशामि।

**चाणक्यः** – भो श्रेष्ठिन्! मा मैवम् , उचितमेवैतत् अस्मद्विधैः सह भवतः , तदुपविश्यतामासन एव।

**चन्दनदासः** – (स्वगतम्) उपलक्षितमनेन किमपि। (प्रकाशम्) यदार्य आज्ञापयति

**चाणक्यः** – भोः श्रेष्ठिन्! चन्दनदास। अपि प्रचीयन्ते सव्यवहाराणां वृद्धिलाभाः वः ?

**चन्दनदासः** – (स्वगतम्) अत्यादरः शङ्कनीयः। (प्रकाशम्) आर्य! अथ किम् आर्यस्य प्रसादेन अखण्डिता मे वाणिज्या।

**चाणक्यः** – भोः श्रेष्ठिन्! अपि कदाचित् चन्द्रगुप्तदोषा अतिक्रान्तपार्थिवगुणान् अधुना स्मारयन्ति प्रकृतीः ?

**चन्दनदासः** –(कर्णौ पिधाय) शान्तं पापम् , शारदनिशासमुद्गतेनेव पूर्णिमाचन्द्रेण चन्द्रश्रियाऽधिकं नन्दन्ति प्रकृतयः।।

**चाणक्यः** – भोः श्रेष्ठिन्! यद्येवं, प्रीताभ्यः प्रकृतिभ्यः प्रियमिच्छन्ति राजानः।

**चन्दनदासः**– आज्ञापयतु आर्यः , किम् अर्थजातमस्माज्जनादिष्यत इति।

**चाणक्यः** – भोः श्रेष्ठिन्! चन्द्रगुप्तराज्यमिदं न नन्दराज्यम्, यतो नन्दस्यैवार्थरुचेरर्थसम्बन्धः प्रीतिमुत्पादयति, चन्द्रगुप्तस्य तु भवतामपरिक्लेश एव।

**चन्दनदासः** – (सहर्षम्) आर्य! अनुगृहीतोऽस्मि।

**चाणक्यः**– भोःश्रेष्ठिन् ! स चापरिक्लेशः कथमाविर्भवतीति न पुनः प्रष्टव्याः स्मो भवता ?

**चन्दनदासः**– आज्ञापयत्वार्यः।

**चाणक्यः**– संक्षेपतो राजनि अविरुद्धाभिर्वृत्तिभिर्वर्त्तितव्यम्।

**चन्दनदासः**– आर्य! कः पुनरधन्य आर्येणावगम्यते ?

**चाणक्यः** – भवान् एव तावत् प्रथमः।

**चन्दनदासः**– (कर्णौ पिधाय) शान्तं पापं, शान्तं पापं, कीदृशस्तृणानामग्निना सह विरोधः ?

**चाणक्यः**– अयमीदृशो विरोधो, यत् त्वमद्यापि राजापथ्यकारिणोऽमात्यराक्षसस्य गृहजनं स्वगृहमभिनीय रक्षसि।

**चन्दनदासः**– आर्य! अलीकमेतत् , केनापि अनार्येण आर्यस्य निवेदितम्।

**चाणक्यः**– भोःश्रेष्ठिन्! अलमाशङ्कया, भीताः पूर्वराजपुरुषाः पौराणामनिच्छतामपि गृहेषु गृहजनं निक्षिप्य देशान्तरं व्रजन्ति, ततस्तत्प्रच्छादनमेव दोषमुत्पादयति।

**चन्दनदासः**– एवं नु इदम्। तस्मिन् समये आसीदस्मद्गृहे अमात्यराक्षसस्य गृहजनः।

**चाणक्यः**– 'प्रथमम् अनृतम् , इदानीम् आसीदिति परस्परविरोधिनी वचने।

**चन्दनदासः**– एतावदेवास्ति मे वाक्छलम्।

**चाणक्यः**– भोः श्रेष्ठिन्! चन्द्रगुप्ते राजनि न परिग्रहः छलानां तत् समर्पय राक्षसस्य गृहजनमच्छलं भवतु भवतः।

**चन्दनदासः**– आर्य! ननु विज्ञापयामि– 'तस्मिन् समये आसीदस्मद्गृहे अमात्यराक्षसस्य गृहजन' इति।

**चाणक्यः**– अथ इदानीं क्व गतः ?

**चन्दनदासः**– न जानामि कुत्र गत इति।

**चाणक्यः**– (स्मितं कृत्वा) कथं न ज्ञायते नाम ? भोःश्रेष्ठिन्। शिरसि फणी दूरे तत्प्रतीकारः। अन्यच्च नन्दमिव विष्णुगुप्तः (अर्धोक्तौ लज्जां नाटयति )

चन्दनदासः– **उपरि घनं घनरटितं दूरे दयिता किमेतदापतितम्।**
**हिमवति दिव्यौषधयः शीर्षे सर्पः समाविष्टः।।**

**चाणक्यः–** चन्द्रगुप्तममात्यराक्षसः समुच्छेत्स्यतीति मैवं मंस्थाः।

पश्य–

**विक्रान्तैर्नयशालिभिः सुसचिवैः श्रीर्वक्रनासादिभि –**
**र्नन्दे जीवति, या तदा न गमिता स्थैर्यं चलन्ती मुहुः।**
**तामेकत्वमुपागतां द्युतिमिव प्रह्लादयन्तीं जगत्**
**कश्चन्द्रादिव चन्द्रगुप्तनृपतेः कर्तुं व्यवस्येत् पृथक्।।**

**चन्दनदासः–** (स्वगतम्) फलेन सम्पादितं शोभते ते विकत्थितम्।

**चाणक्यः–** राजा अपथ्यकारिषु तीक्ष्णदण्डः। न मर्षयिष्यति राक्षसकलत्रप्रच्छादनं भवतः, तद् रक्ष परकलत्रेण आत्मनः कलत्रं जीवितं च।

**चन्दनदासः–** आर्य! किं मे भयं दर्शयसि ? सन्तमपि गेहे अमात्यराक्षसस्य गृहजनं न समर्पयामि, किं पुनरसन्तम्।

**चाणक्यः–** चन्दनदास! एष ते निश्चयः ?

**चन्दनदासः–** बाढम् एष मे स्थिरो निश्चयः।

**चाणक्यः–** (स्वगतम्) साधु चन्दनदास। साधु।

**सुलभेष्वर्थलाभेषु परसंवेदने जनः।**
**क इदं दुष्करं कुर्यादिदानीं शिविना विना।।**

## शब्दार्थाः

| | | |
|---|---|---|
| **शब्दायितः** | आकारितः | बुलाया गया |
| **जातदोषः** | कृतापराधः | जिसपर दोषारोपण हुआ हो |
| **हतकः** | दुष्टः , घातुकः | 'हत्यारा 'के अर्थ में गाली |
| **विचिनोति** | अन्वेषणं करोति | खोजबीन कराता है |
| **परिभवादपि** | अपमानात् अपि | अपमान से भी (अधिक) |
| **उपलक्षितम्** | दृष्टं किमपि लक्षणम् | कुछ लक्षण देख लिया |
| **अर्थरुचेः** | धनाभिलाषिणः | धन चाहने वाले (का) |
| **अपरिक्लेशः** | कष्टाभावः , सुखम् | कष्ट न देना |
| **पिधाय (अपि+धा+ल्यप्)** | संवृत्य | बन्द करके |
| **अलीकम्** | मिथ्या | झूठ |
| **प्रच्छादनम्** | गूहनम् | छिपाना |
| **वाक्छलम्** | अनवधानतया वचनम् | जीभ फिसलना |
| **फणी** | सर्पः | साँप |
| **प्रतीकारः** | रक्षोपायः | बचने का साधन |

| | | |
|---|---|---|
| **मंस्थाः(मन्+लुङ्)** | मन्यस्व | मान लो |
| **विक्रान्तैः** | बलशालिभिः | पराक्रमियों द्वारा |
| **प्रह्लादयन्ती** | प्रसादयन्ती | प्रसन्न करने वाली |
| **व्यवस्येत्** | उद्यमं कुर्यात्, प्रयतेत | प्रयास कर सकता है |
| **विकत्थितम्** | आत्मप्रशंसा | बड़बोलापन |
| **तीक्ष्णदण्डः** | कठोर दण्डदाता | कड़ी सजा देने वाला |
| **परसंवेदने** | सहानुभूतिकार्ये, परोपकारे | सहानुभूति में, परोपकार में |

## व्याकरणम्

## समासः

अखण्डिता – न खण्डिता (नञ् तत्पुरुषः)। चन्द्रगुप्तनृपतिः चन्द्रगुप्तनामा नृपतिः (मध्यमपदलोपी)। तीक्ष्णदण्डः – तीक्ष्णः कठोरः दण्डो यस्य सः (बहुव्रीहिः)। अर्थलाभेषु – अर्थस्य लाभः (षष्ठीतत्पुरुषः), तेषु। राक्षसकलत्रप्रच्छादनम् (षष्ठीतत्पुरुषः)।

## सन्धिः

चाणक्योऽस्मिन्नकरुणे = चाणक्ये + अस्मिन् + अकरुणे

आगतोऽस्मि = आगतः + अस्मि

जयत्वार्यः = जयतु + आर्यः

नाट्येनावलोक्य = नाट्येन + अवलोक्य

भूमावुपविशामि = भूमौ + उपविशामि

मैवम् = मा + एवम्

यद्येवम् =यदि + एवम्

अस्माज्जनादिष्यते = अस्मात् + जनात् + इष्यते

आविर्भवतीति = आविः + भवति + इति

अविरुद्धाभिर्वृत्तिभिर्वर्त्तितव्यम् = अविरुद्धाभिः + वृत्तिभिः + वर्तितव्यम्

राजापथ्यकारिणोऽमात्यराक्षस्य = राजापथ्यकारिणः + अमात्यराक्षसस्य

पुनरधन्यः = पुनः + अधन्यः

कीदृशस्तृणानाम् = कीदृशः + तृणानाम्

ततस्तत्प्रच्छादनम् = ततः + तत् + प्रच्छादनम्

आसीदस्मद्गृहे = आसीत् + अस्मत् + गृहे

एतावदेवास्ति = एतावत् + एव + अस्ति

यदाज्ञापयत्युपाध्यायः = यत् + आज्ञापयति + उपाध्यायः

सुलभेष्वर्थलाभेषु = सुलभेषु + अर्थलाभेषु

## अभ्यासः

1. **अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत –**

i. चन्दनदासः कः आसीत् ?

ii. चाणक्यः कः आसीत् ?

iii. अस्मिन् पाठे चाणक्यः किम् इच्छति स्म ?

iv. अमात्यराक्षसः स्वगृहजनं कुत्र निक्षिप्य गतः ?

v. चन्द्रगुप्तः कः आसीत् ?

2. **अधोलिखितेषु वाक्येषु कोष्ठकात् समुचितं पदम् आदाय रिक्तस्थानानि पूर्यन्ताम् –**

i. एष में स्थिरो ........................ । (निश्चयम्, निश्चयः)

ii. तस्मिन् समये आसीदस्मद् .............. अमात्यराक्षसस्य गृहजनः । (गृहस्य , गृहे)

iii. न जानामि स कुत्र ................ (गतः , गतम्)

iv. तद् रक्ष .................. आत्मनः कलत्रं जीवितं च । (परकलत्रेण , परकलत्रस्य)

v. यद्येवं प्रीताभ्यः ................ प्रियमिच्छन्ति राजानः । (प्रकृतिः , प्रकृतिभ्यः)

3. **निम्नलिखितानाम् पदानां संस्कृतवाक्येषु प्रयोगं कुरुत –**

गृहजनः , कलत्रम् , परिक्लेशः , अलम् , वणिक् ।

**5. निम्नलिखितेषु वाक्येषु कोष्ठाद्, कितानां पदानाम् उचितविभक्तौ प्रयोगः क्रियताम् –**

i. ............... राक्षसस्य गृहजनः कुत्र अस्ति ? (अमात्य)

ii. ............... समये आसीदस्मद्गृहे अमात्यराक्षसस्य गृहजनः(तत्)

iii. कीदृशः तृणानाम् ............... सह विरोधः ? (अग्नि)

iv. न मर्षयिष्यति राक्षसकलत्रप्रच्छादनं ............... । (भवत्)

v. सः अति ............... कार्यं करोति (दुष्कर)

**6. सन्धिविच्छेदं कुरुत –**

कश्चन्द्रादिव , भूमावुपविशामि , जयत्वार्यः , यदाज्ञापयत्युपाध्यायः , सुलभेष्वर्थलाभेषु ।

**7. निम्नलिखितानाम् शब्दानां प्रकृति–प्रत्यय–विभागं कुरुत –**

प्रणम्य, उपसृत्य , प्रष्टव्यः , कृत्वा , कर्तुम्।

**8. अधोलिखितानाम् शब्दानां रिक्तस्थानेषु प्रयोगं कुरुत –**

**शोभते , उपचारः , गृहजनम् , चन्दनदासः , अनार्येण**

i. श्रेष्ठी ............... अत्र आगतः ।

ii. अनुचित ............... परिभवादपि महद्दुःखमुत्पादयति ।

iii. समर्पय राक्षसस्य ............... अच्छलं भवतु भवतः।

iv. अलीकमेतत् , केनापि ............... आर्यस्य निवेदितम्।

v. फलेन सम्पादितं ............... ते विकत्थितम्।

8. **अधोलिखितेषु पदेषु प्रयुक्ताः धातवः प्रत्येकं पदस्य समक्षं लिख्यन्ताम्–**

| **पदम्** | | **धातु** |
|---|---|---|
| i. | अस्ति | ... |
| ii. | वर्त्तितव्यम् | ... |
| iii. | उपविश्यताम् | ... |
| iv. | अवलोक्य | ... |
| v. | जयतु | ... |
| vi. | भवति | ... |
| vii. | कर्तुम् | ... |
| viii. | रक्षसि | ... |
| ix. | व्रजन्ति | ... |
| x. | उत्पादयति | ... |